# .. mAndhAtRishaileshvarI stotra ..

# ॥ માન્ધાતૃશૈલેશ્વરીસ્તોત્ર ॥

## Document Information

Text title : mAndhAtRishaileshvarI aShTakam

File name : mAndhAtRishaileshvarI8.itx

Category : aShTaka

Location : doc_devii

Author : Ottuur Unni Namboodripaadu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Usha Iyer iyerku at gmail.com

Proofread by : Usha Iyer iyerku at gmail.com

Latest update : June 19, 2011

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ માન્ધાતૃશૈલેશ્વરીસ્તોત્ર ॥

શ્રી ગણેશાય નમઃ ॥

વન્દે નીલકલેવરાં ત્રિનયનાંદંષ્ટ્રાકરાલાનનાં,
ઘણ્ટા મર્મશરાવમુણ્ડ ભુજગૈઃ ખટ્વાઙ્ગશૂલાસિભિઃ ।
આરૂઢાષ્ટભુજાં કિરીટરશનાઘોષાદિભિર્ભૂષણૈ -
રાશીર્ષાઙ્ઘ્રિવિટઙ્કિતાં ભગવતીમ્ માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૧॥

મઞ્જીરૈર્મુખરીકૃતાઙ્ઘ્રિયુગલાં સન્ધ્યાભ્રશોણાંબરાં
ચઞ્ચદ્ઘોરકૃપાણપાણિકમલા મુજ્જૃમ્ભિતભ્રૂલતાં ।
સારંભપ્રસરત્સ્ફુલિઙ્ગ નયનામુચ્ચાટ્ટહાસસ્વનૈર્
નિર્ધૂતાખિલસદ્ભયામનુભજે માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૨॥

વન્દે વક્ષસિવૃક્ણદાનવશિરો માલામયં કઞ્ચુકં,
કર્ણે કુઞ્જરકુણ્ડલં કટિતટે ભોગીન્દ્રકાઞ્ચીગુણમ્ ।
હસ્તેદારિકરક્તપઙ્કિલમુખં ધૃત્વા ખલાનાં ભયં,
શિષ્ટાનામભયં ચ યા દિશતિ તાં માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૩॥

સ્મેરાપાઙ્ગવિલોકવિભ્રમરસૈઃ શૂલાદિભિશ્ચાયુધૈઃ -
સાધૂનાં ચ દુરાત્મનાં ચ હૃદયગ્રન્થિંસકૌતૂહલમ્ ।
કૃન્તન્તીમ્ ભુવનત્રયૈકજનનીં વાત્સલ્યવારાન્નિધિં
વન્દેઽસ્મત્ કુલદેવતાં શરણદાં માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૪॥

શુદ્ધાન્તઃકરણસ્ય શમ્ભુચરણાં ભોજેપ્રપન્નાત્મનો,
નિષ્કામસ્ય તપોધનસ્ય, જગતાં શ્રેયોવિધાનાર્થિનઃ ।
માન્ધાતુર્હિતકારિણીં ગિરિસુતા પુત્રીં કૃપાવર્ષિણીં
વન્દે ભક્તપરાયણાં ભગવતીમ્ માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૫॥

કૈલાસાદવતીર્યભાર્ગવવરક્ષોણીગતે પાવન -
ક્ષેત્રેસન્નિહિતાંસદા હરિહરબ્રહ્મ્યાદિભિઃ પૂજિતાં ।
ભક્તાનુગ્રહકાતરાં, સ્થિરચરપ્રાણિવ્રજસ્યામ્બિકાં
માન્ધાતુર્વંશવર્તિનીમનુભજે માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૬॥

સંખ્યાતીતભટૈર્વૃતેનરિપુણા સામૂતિરિક્ષોણિપે
નાક્રાન્તસ્યનિજાઙ્ઘ્રિમાત્રશરણસ્યાત્યલ્પસેનાભૃતઃ
પ્રાણંવલ્લુવભૂમિપસ્યતિલશસ્તેષાંશિરચ્છેદનૈ -
રક્ષન્તીમનુકમ્પયાનુકલયે માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૭॥

તુર્યસ્થાનવિહારિણીમશરણાનુદ્ધર્તુમાકાંક્ષિણી -
માર્ષોર્વ્યામવતારિણીં ભૃગુવરક્ષેત્રેસ્થિરાવાસિનીમ્ ।
ભક્તાનામભયઙ્કરીમવિરલોત્સર્પત્ કૃપાનિર્ઝરીં
વાતાધીશ સહોદરીં પરિભજે માન્ધાતૃશૈલેશ્વરીમ્ ॥ ૮॥

Composed by OttUr Unni NamboodripAdu

Encoded and proofread by Usha K.Iyer iyerku at gmail.com

.. mAndhAtRishaileshvarI stotra ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*